Jogmaya

Page No. | Date

* 'नाज्झलौ' इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः। (पृ-५१)

दीक्षितमहाभागेन सिद्धान्तकौमुद्याः अच्-सन्धि-प्रकरणे 'अकः सवर्णे दीर्घः' इति सूत्रस्य वृत्तौ वाक्यस्य उल्लेखः कृतः। 'अकः सवर्णे दीर्घः' इति सूत्रेण अकः सवर्णे अचि परे दीर्घैकादेशो भवति।

प्रस्तुतेऽस्मिन् सूत्रे 'इको यणचि' इति सूत्रात् अचीति पदस्यानुवृत्तिर्भवति। किन्तु सूत्रेऽस्मिन् अचीति पदस्य प्रयोजनविषये दीक्षितेन प्रत्युदाहरणं प्रदत्तं 'कुमारी शेते' इति। अत्रोच्यते सूत्रेऽस्मिन् अचीति पदस्याभावे 'कुमारी शेते' इति स्थले ईकारशकारयोः स्थाने दीर्घैकादेशः प्राप्नोति। अचीति पदस्याभावे सूत्रस्यार्थः स्यात् अक्-वर्णानुमुत्तरं यदि सवर्णः विद्यते तर्हि दीर्घैकादेशो भवति। उत्तरवर्णः अच्वर्णः हल्वर्णो वा यदि स्यात् तर्हि दीर्घैकादेशो भवति। 'कुमारी शेते' इति स्थले ईकारोत्तरः शकारो वर्तते। ईकारः अक्-वर्णः, शकारोऽपि तस्य सवर्णैव। यतो हि उभयोरुच्चारणस्थानं समानमेव। 'तुल्यास्य-प्रयत्नं सवर्णम्' इति सूत्रेणोभयोः वर्णयोः सवर्णसंज्ञा भवति। तेन ईकारशकारयोर्मध्ये दीर्घैकादेशस्यापत्तिः जायते। किन्तु सूत्रे यदि अचिपदं स्यात्तर्हि दोषो न भवति। यतो हि शकारः ईकारस्य सवर्णसत्त्वेऽपि न तु अच्-वर्णः। अतोऽत्र प्रस्तुतस्य सूत्रस्य प्रयोगो न भवति तेन दीर्घैकादेशोऽपि न जायते।

अत्र प्रश्नो जायते ईकारशकारयोः स्थानप्रयत्नयोः समानसत्त्वेऽपि सवर्णसंज्ञा न प्राप्नोति 'नाज्झलौ' इति सूत्रनिषेधात्। अत्र ईकारः अच्वर्णः शकारस्तु हल्-वर्णः। तेनोभयोः सवर्णतायाः असिद्धत्वे 'कुमारी शेते' इत्यत्र दीर्घैकादेशो न प्राप्नोति। पुनश्च सूत्रेऽस्मिन् अचीति पदस्यानुवृत्तिरपि व्यर्था भवति। अतोऽस्य प्रश्नस्य उत्तरे दीक्षितमहाभागेनोक्तम्- "'नाज्झलौ' इति सावर्ण्यनिषेधस्तु" इति वाक्यम्। 'नाज्झलौ' इति सूत्रेण ईकारशकारयोः

Teacher's Signature गौतमः 30.3.2020

Scanned by CamScanner

सवर्णतायाः निषेधो न भवति। अच्-प्रत्याहारेण साधारणतः
माहेश्वरसूत्रे पठितानां वर्णानामेव बोधो जायते न दीर्घ-
आकारईकारयोः, यतो हि एतेषां दीर्घवर्णानां माहेश्वरसूत्रे
अन्तर्भावो नास्ति। किन्तु 'अणुदित् सवर्णस्य चाप्रत्ययः'
इति ग्रहणकसूत्रबलात् 'इको यणचि' इति सूत्रे
ह्रस्ववर्णैः सह दीर्घवर्णानामपि ग्रहणं भवति। किन्तु
'नाज्झलौ' इति सूत्रे 'अणुदित्...' इति सूत्रस्य
प्रवृत्तिरेव नास्ति। तेनात्र ~~आका~~ अकारेकारयोः 'आकारेकारौ'
ग्राहको न भवति। अतः इकार-शकारयोः सवर्णता
सत्योऽपि इकार-शकारयोः सवर्णसंज्ञा बाधिता भवति।

अत एव 'नाज्झलौ' इति सूत्रे 'अणुदित्...'
इति सूत्रस्य प्रवृत्त्यसम्भवात् ईकारशकारयोः
सवर्णसंज्ञायां प्रवृत्ति भवति। ईकारशकारयोः सवर्ण-
संज्ञायां सत्यां, 'अकः सवर्णे दीर्घः' इति सूत्रे
अचीति पदस्यानुवृत्तेरभावात् 'कुमारी शेते' इति
स्थले दीर्घैकादेशस्यापत्तिः स्यात्। तथा न स्यात्
तदर्थमेव सूत्रे अचीति पदस्य संयोजनं भवतीति शम्।

Teacher's Signature 30.3.2020 2.10 PM

Scanned by CamScanner

* अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्, 'व्रश्च' इति सूत्रे राजेः पृथग् भ्राजिग्रहणात् ज्ञापकात्। (पृ-३८)

वाक्यमिदं "प्रादूहोढोढ्येषैष्येषु" इति वार्त्तिकस्य व्याख्यायां भट्टोजिदीक्षितमहाभागेन सिद्धान्तकौमुद्याः अच्-सन्धिप्रकरणे उल्लिखितम्।

वार्त्तिकेनानेन प्रोपसर्गात् परं ऊह-ऊढ-ऊढि-एष-एष्य-इत्येतेषां शब्दानां वर्तमानात् वृद्धिरेकादेशो भवति। यथा प्र-ऊढः = प्रौढः इति। किन्तु अत्र प्रश्नो जायते यत् तर्हि 'प्र-ऊढवान्' इत्यत्रापि वृद्धिरेकादेशो भवति? अस्योत्तरे उच्यते न भविष्यति। शाब्दिकाः एकस्य परिभाषायाः उल्लेखः क्रियन्ते तद्धि-" अर्थवद्-ग्रहणे नानर्थकस्य ग्रहणम्" इति। सार्थकशब्देन सह कार्यं भवति न तु निरर्थकशब्देन। एषा परिभाषा ज्ञापकसिद्धा। 'व्रश्चभ्रस्ज' इति सूत्रेण उल्लिखितानां धातूनाम् अन्त्यवर्णस्थाने षकार आदेशो भवति। सूत्रेऽस्मिन् पृथक्-रूपेण राज्-धातोः भ्राज्-धातोश्च उल्लेखो वर्तते। किन्तु अत्र प्रश्नो जायते पृथक्रूपेण कथं भ्राज्-धातोः ग्रहणं जायते? राज्-धातोरुल्लेखेनैव भ्राज्-इत्यस्य धातोः ग्रहणं भवति। तेन राज-धातोरन्त्यस्य जकारस्य स्थाने ष-कारस्य आदेशो भवति। अपि च, भ्राज्-इत्यस्य धातोर्मध्ये एव राज्-धातुर्वर्तते (भ् राज्)। तेन राज्-धातोः जकारस्य स्थाने षकारादेशेनैव द्वयोः धातोः कार्य-सिद्धिर्जायते। किन्तु सूत्रकारेण 'व्रश्चभ्रस्ज' इति द्वयोः धातोरुल्लेखः कृतः। एतेन भ्राज-धातोरन्तरे राज्-धातोः सत्त्वेऽपि षकारो न भवति। यतो हि राज्-धातुरयं भ्राज्-धातोरंशविशेषः तेनास्य धातोः पृथक् अर्थोऽपि न विद्यते तेनात्र भ्राज्-धातोः पृथक्तया ग्रहणं कर्तव्यम्। एवम्प्रकारेणास्या परिभाषायाः सार्थकता विचार्यते। अपि 'स्वं रूपं शब्दस्याशब्दसंज्ञा" इत्यस्मिन् परिभाषासूत्रे रूप-इत्यस्य ग्रहणेनापि एषा परिभाषा ज्ञापिता भवति।

अस्याः परिभाषायाः उदाहरणरूपेण ऊढ-

Teacher's Signature

शब्दस्य प्रयोगः द्विधा भवति। प्रथमतः वह्-धातो-रुत्तरं क्त-प्रत्यये ऊढ इति सम्पूर्णशब्दस्य निष्पत्ति-र्जायते। यस्तु शब्दः अर्थवान्। द्वितीयतः वह्-धातो-रुत्तरं क्तवतु-प्रत्यये 'ऊढवत्' इति शब्दो निष्पद्यते। अत्रापि 'ऊढ' इति शब्दोऽस्ति, यस्तु न पृथक् शब्दः किन्तु शब्दस्यांशविशेषः, तस्य स्वस्यार्थोऽपि नास्ति। अतः प्रस्तुतेन परिभाषाबलेन प्रथमस्थे (प्र+ऊढः) वृद्धिर्भवति न तु प्र+ऊढवान् इति स्थले। अत्र तु 'आद्गुणः' इति सूत्रेण गुणैकादेशे ओकारे प्रोढवान् इति रूपं भवतीति शम्।

* "मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम" इत्यत्र तु इवार्थे व-शब्दो वा-शब्दो वा बोध्यः। (पृ-८६)

दीक्षितमहाभागेन सिद्धान्तकौमुद्याः अच्-सन्धि-प्रकरणे "ईदूदेद् द्विवचनं प्रगृह्यम्" इति सूत्रस्य वृत्तावुक्तमिदं वचनम्। प्रस्तुतेन सूत्रेण प्रगृह्यसंज्ञा विधीयते।

इकारान्तः, उकारान्तः, एकारान्तः द्विवचनान्तपदानां प्रगृह्यसंज्ञा भवति। अस्योदाहरणं हि हरी एतौ, विष्णू इमौ, गङ्गे अमू इत्यादयः। हरी एतौ इत्यत्र हरिशब्दस्य द्विवचनान्तं रूपं हि हरी अतः अत्र प्रस्तुतेन सूत्रेण प्रगृह्यसंज्ञा जायते। एतेन हरी एतौ इति स्थले "इको यणचि" इति सूत्रेण प्राप्तस्य यणादेशस्य निषेधो भवति तेन हरी एतौ इत्येवं रूपं स्थास्यति।

अत्र टीकाकाराः विषयैकस्यौल्लेखः कृतः। तेषां नये 'हरी' इति पदे ईकारः द्विवचनविभक्तिः भवितुं नार्हति। हरिशब्दस्य प्रथमायाः द्विवचने 'हरि औ' इति स्थिते। "प्रथमयोः पूर्वसवर्णः" इति सूत्रेण पूर्वसवर्णदीर्घैकादेशे 'हरी' इति रूपं भवति। तेन द्विवचनविभक्तिः औकारोऽत्र नास्ति तथा प्रकृते इ-कारोऽपि ईकारो जातः। अतः अत्र प्रस्तुतेन सूत्रेण प्रगृह्यसंज्ञापि न भवति। किन्तु अत्रोच्यते "अन्तादिवच्च" इति सूत्रेण अत्र परादिवद्भावो भवति। अनेन सूत्रेण 'हरी' इत्यत्र एकादेशः ईकारः कार्यार्थे पूर्वाङ्गस्य अन्तवयवरूपेण पराङ्गस्य आद्यवयवरूपेण स्वीकारो भवति। "हरी" इत्यत्र इकार-औकारयोः स्थले एकादेशो ईकारो भवति। अयम् ईकारः द्विवचनविभक्तेः औकारस्य आदिरूपेण ग्रहणं भवति। तेनायम् ईकारः द्विवचनविभक्तिरूपेण स्वीक्रियते।

दीक्षितेन "मणी वोष्ट्रस्य लम्बेते" इत्यत्र पदसाधुत्वं निर्णितम्। 'मणीवोष्ट्रस्य' इत्यस्मिन् स्थले सन्धिकार्ये

Teacher's Signature गौतमः 25.3.2020

Scanned by CamScanner

भवति। अस्य विसन्धिकं रूपं हि "मणि इव उष्ट्रस्य" इति। 'मणि इव' इत्यत्र सन्धौ सवर्णदीर्घे 'मणीव' इति रूपं भवति। किन्तु तन्न युक्तियुक्तम्। कारणं 'मणी' इति प्रथमायाः द्विवचनान्तं रूपं तेन प्रस्तुतेन सूत्रेण प्रगृह्यसंज्ञायां सन्धिनिषेधो भवति। परन्तु दीक्षितमहोदयस्य नये 'मणीवोष्ट्रस्य' इत्यत्र विसन्धिकं रूपं हि "मणी वा उष्ट्रस्य" "मणी व उष्ट्रस्य" चेति। तेन प्रगृह्यसंज्ञायां सत्यां सन्धेरवकाशो नास्ति। अर्थान्तरमपि न जायते व-शब्दो वा-शब्दश्च इवार्थे वर्तते इति शम्।

* पुरस्तादपवादन्यायेन वृद्धिः "एङि पररूपम्" इत्यस्यैव बाधिका न तु "ओमाङोश्च" इत्यस्य। (पृ-३५)

सिद्धान्तकौमुद्याः अच्सन्धिप्रकरणे भट्टोजि-दीक्षितमहाभागेन "एत्येधत्यूठ्सु" इति सूत्रस्य वृत्तौ वाक्यस्यास्योल्लेखः कृतः। "एत्येधत्यूठ्सु" इति सूत्रेण अवर्णादेजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशो भवति।

साधारणरूपेण "एत्येधत्यूठ्सु" इति सूत्रम् 'एङि पररूपम्' 'ओमाङोश्च' इत्यनयोः सूत्रयोः अपवादो भवति। निरवकाशविधिः अपवादः इत्युच्यते। अर्थात् यदि 'एङि पररूपम्' 'ओमाङोश्च' इति सूत्रद्वयस्य सर्वत्रैव प्रयोगो भवति तर्हि प्रस्तुतस्य सूत्रस्य किमपि स्थानं न प्राप्यते यत्र प्रस्तुतस्य सूत्रस्य प्रयोगो भवेत्। यथा 'उप एति' इति स्थले 'एङि पररूपम्' इति सूत्रस्य प्रयोगो जायते यतो हि अत्र अवर्णान्ताद् उपसर्गादनन्तरम् एङादेः धातोः 'एति' इति रूपं वर्तते। तेन पररूपैकादेशे "उपेति" इति भवति। पुनश्च "उप एति > उप आ इति > उप एति" इति "ओमाङोश्च" इति सूत्रेण पररूपं

Teacher's Signature — 29.3.2020 12.10 AM

Scanned by CamScanner

प्राप्नोति। यतो ह्यत्र अवर्णात् परम् आङ् (आ) अस्ति। अत एव प्रस्तुतस्य सूत्रस्य प्रयोगस्थानमेव न प्राप्यते।

दीक्षितस्य नये 'एत्येधत्यूठ्सु' इति सूत्रं यदि 'एङि पररूपम्' 'ओमाङोश्च' इत्यनयोः सूत्रयोः बाधकरूपेण स्वीक्रियते तर्हि अनिष्टापत्तिः स्यात्। प्रथमतः 'अव एहि' इति स्थले 'एहि' इत्यत्र विसन्धिकार्ये 'आ इहि' इति जाते, "आद् गुणः" इति सूत्रेण गुणैकादेशे 'एहि' इति भवति, तदनन्तरम् 'अव एहि' इति अवस्थायाम् 'अन्तादिवच्च' इति सूत्रेण परादिवद्भावः, ततः 'आद्यन्तवदेकस्मिन्' इति सूत्रेण व्यपदेशिवद्भावे 'एहि' इति रूपम् इण्-धातोः एजादिरूपेण ग्रहणं भवति। तेन 'अव एहि' इति स्थले 'एत्येधत्यूठ्सु' इति सूत्रम् 'एङि पररूपम्,' 'ओमाङोश्च' चेति सूत्रद्वयं बाधित्वा वृद्धौ ऐकारे 'अवैहि' इति रूपं भवति। यत्तु असिद्धं रूपम्।

अस्याः समस्यायाः समाधाने दीक्षितमहाभागैः पुरस्तादपवादन्यायस्योल्लेखः कृतः। अत्रादौ अपवादस्य तथा बाधकसूत्रयोः क्रमोल्लेखः क्रियते – 'एत्येधत्यूठ्सु' ६.१.८९, 'एङि पररूपम्' ६.१.९४, 'ओमाङोश्च' ६.१.९५। आदौ अपवादसूत्रस्यावस्थानात् ननु 'पुरस्तादपवादाः', एतादृशः अपवादविषये वैयाकरणाः नियमविशेषस्योल्लेखः कृतः – 'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति। एकस्य बाधकसूत्रस्य नैकानि बाध्यसूत्राणि स्थास्यन्ति, किन्तु बाधकसूत्रस्य अवस्थानं यदि आदौ स्यात्तथा बाध्यसूत्राणि यदि तदनन्तरं स्युः तर्हि तत्र बाधकसूत्रस्य निकटे यत् सूत्रमवतिष्ठते तदेव बाधते बाधकसूत्रं नोत्तरान्। एतेन 'एत्येधत्यूठ्सु' इति सूत्रम् 'एङि पररूपम्' इति सूत्रं बाधते न तु 'ओमाङोश्च' इति। तेन 'अव एहि' इति स्थले 'ओमाङोश्च' इति पररूपैकादेशे 'अवेहि' इति सिद्धं रूपं सिध्यते। 'अवैहि' इति तु असिद्धं रूपमिति शम्।

Teacher's Signature गौतमः
२५.३.२०२०

Scanned by CamScanner